कारित्वं च पातञ्जलादौ दर्शितं यथा। "परार्थं संहत्य कारित्वादिति" पात०। इतरसाहित्येनार्थक्रियाकारित्वं संहत्यकारिता, संहननञ्च आरम्भकसंयोगभेदः। तथा च देहादिकं परार्थं (स्वेतरस्य भोगापवर्गफलकम्,) संहतत्वात् शय्यासनादिवदित्यनुमानप्रयोगः। अतएव सांख्यसूत्रे "संहतपरार्थत्वादिति" संहन्तृसिद्धिरुक्ता। संहतानां देहादीनां स्वेतरस्य भोगादिफलकत्वात् संघातातिरिक्तः पुरुषोऽनुमीयते नहि अचेतनानां देहादीनां स्वतः संघातः सम्भवति अतः संघातसिद्धये पुरुषसिद्धिरिति समुदितार्थः। "संयोगाश्च विभागान्ता" इत्युक्तेः संयोगभेदरूपसंहननस्यावश्यं वियोगान्तत्वात् देहादीनां तदवयवानाञ्च क्रमेणारम्भकसंयोगनाशेन परस्परवियोग इत्यतोऽङ्गादेरवश्यवियोगवत्त्वात् तथात्वम् अतएव "अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिण" इति गीतायामारम्भकसंयोगनाशपूर्व्वकपरस्परवियोगेन नाश उक्तः। "लौहोद्गनघनस्कन्धा ललितापघनां स्त्रियमिति" भट्टिः। अपगतो घनो मेघो यस्मात् प्रा०ब० वा गतलोपः। मेघावरणशून्ये त्रि० वा गतलोपाभावे अपगतघनोऽप्युक्तार्थे। [मरणे च।

**अपघात** पु० अप—हन—भावे घञ्। अपकृष्टहनने दुष्टहेतुक-

**अपघातक** पु० अपहन्ति अप+हन—ण्वुल्। विनाशके। "जिज्ञासा तदपघातके हेतौ" सां०का० पाठान्तरम्।

**अपघातिन्** त्रि० अप+हन—कर्त्तरि णिनि। अपहननकर्त्तरि स्त्रियां ङीप्।

**अपच** पु० न पक्तुं शक्तः पच—"अच्कावशक्ताविति" पा०। अच्। पक्तुमशक्ते। "अपचः पक्तुमशक्त" इति सि०कौ०।

**अपचय** पु० अप+चि भावे अच्। हानौ, अपहरणे, व्यये च।

**अपचरित** न० अपकृष्टं चरितं प्रा०स०। अपकृष्टचरिते सदोषाचरणे, "आहोस्वित् प्रसवो ममापचरितैर्विष्टम्भितो वीरुधामिति" शकु०।

**अपचार** पु० अप+चर—भावे घञ्। अहिताचरणे अपथ्यसेवने "कृतापचारोऽपि परैरनाविष्कृतविक्रियः। असाध्यं कुरुते कोपं प्राप्ते काले गदो यथेति" माघः। "अपचारः अपकारः अपथ्यञ्चेति" मल्लि०। "योनिप्रदोषाच्च भवन्ति शिश्ने पञ्चोपदंशा विविधापचारैरिति" वैद्य०। वैपरीत्यादिहेतुकदोषे "नापचारमगमन् क्वचित् क्रिया" इति माघः। "अपचारं लोपविपर्य्यासादिदोषमिति" मल्लि०। विनाशे च "महाध्वरे विध्यपचारदोष" इति किरा०। "अपचारः कर्म्मलोपदोष" इति मल्लि०। "मुद्गापचारे माषप्रतिनिधाविति" मीमांसा। अपकर्म्मणि च "गूहमानाऽपचारं सा बन्धुपक्षभयात्तदा" भा०आ० प० १११ अ०।

**अपचारिन्** त्रि० अप+चर-तच्छीलार्थे कर्त्तरि घिनुण्। अपकर्म्मकरणशीले स्त्रियां ङीप्। "पत्यौ भार्य्यापचारिणीति" मनुः। "भार्य्या अपचारिणी व्यभिचारिणी जारपतिं चममाणे भर्त्तरि पापं संश्लेषयतीति" कुल्लूकभट्टः।

**अपचिकीर्षा** स्त्री अपकर्त्तुमिच्छा अप+कृ—सन्-भावे स्त्रियाम् अ। अपकर्त्तुमिच्छायाम्। [कारकरणेच्छावति।

**अपचिकीर्षु** त्रि० अपकर्त्तुमिच्छुः अप+कृ—सन्—उ। अप-

**अपचित्** त्रि० अप+चि—क्विप्। अपचयकारके। "इतस्ताः सर्वानश्यन्तु बाधका अपचितामिव" अथ० ६,२५,१।

**अपचित** त्रि० अपचाय्यते आनन्देन पूज्यते चाय—पूजनादौ क्त चायतेश्चिः अपशब्दस्यानन्दपूर्व्वकत्वम्। आनन्देन पूजिते। पूजितो हि आनन्दपूर्व्वकं पूज्यते। अप+चि—क्त। जातापचये अवयवाद्यपचययुक्ते, हीने, व्ययिते च। "तत्रापचितवलाः प्राणिनोभवन्ति" सुश्रुतः।

**अपचिति** स्त्री० अप+चाय—क्तिन् चायतेश्चिः। पूजायाम् "विहितापचितिर्महीभृता" इति माघः। अप+चि—क्तिन्। अपचये हीनतायाम्, अपक्षयरूपभावविकारभेदे च।

**अपची** स्त्री अपकृष्टं पच्यतेऽसौ पच—कर्मकर्त्तरि अच् अप्राशस्त्ये न०त० गौ० ङीष्। गण्डमालापरिजाते रोगभेदे "अथातोग्रन्थ्यपच्यर्वुदगण्डमालानां निदानं व्याख्यास्याम" इत्युपक्रम्य "अनन्यवर्णैरुपचीयमानं चयप्रकर्षादपचीं वदन्ति कण्डूयनान्तेऽल्परुजाः प्रभिन्नाः स्रवन्ति नश्यन्ति भवन्ति चान्ये" इति सुश्रुते तल्लक्षणमुक्तम्। "ते ग्रन्थयो केचिदनाप्तपाकाः स्रवन्ति नश्यन्ति भवन्ति चान्ये। कालानुबन्धं चिरमादधाति सैवापचीति प्रवदन्ति केचिदिति" वै० "नाड़ीं कफानिलकृतामपचीं व्रणांश्चेति" अपचीं गण्डमालां च ग्रहणीं शोथमेव वेति" च सुश्रुतः। [यमाणे।

**अपचीयमान** त्रि० अप+चि—कर्मकर्त्तरि शानच्। अपची-

**अपच्छाय** पु० अपगता देहच्छाया कान्तिर्वास्य प्रा०ब० वा गतलोपश्च। देवे देहच्छायाशून्यत्वात्तेषामपच्छायत्वम्। अतएव "भजन्तु रूपं कियदस्य देवास्छाया नलस्यास्ति तथापि नैषाम्। इतीरयन्तीव तथा निरैक्षि सा (छाया) नैषधे नलमरेषु तेषु" इति नैषधे देवानां छायाराहित्यं लक्षणत्वेन वर्णितम्। अपगतकान्तौ त्रि०।

**अपच्यव** पु० अप+च्युङ्—गतौ भावे अप्। अपसरणे निर्गमने